Shri Nrisimha Kavacham

# અપમૃત્યુહરં શ્રીનૃસિંહકવચમ્

## Document Information

Text title : Nrisimhakavacham ApamrityuharaM

File name : nRRisiMhakavachamapamRRityuharam.itx

Category : vishhnu, kavacha, dashAvatAra

Location : doc_vishhnu

Transliterated by : Ganesh Kandu kanduganesh at gmail.com

Proofread by : Ganesh Kandu, NA

Description/comments : sUryAruNasaMvAde

Latest update : August 12, 2018, July 5, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2021

*sanskritdocuments.org*

# અપમૃત્યુહરં શ્રીનૃસિંહકવચમ્

શ્રીગણેશાય નમઃ ।
અથાપરં પ્રવક્ષ્યામિ હ્યલ્પમૃત્યુ હરંપરમ્ ।
ઉપાયં યત્કૃતેનાઙ્ગ શીઘ્રં મૃત્યુર્નિવર્તતે ॥ ૧॥

નૃસિંહકવચં નામ સ્તોત્રં પરમદુર્લભમ્ ।
યસ્ય ધારણયા ક્ષિપ્રમલ્પમૃત્યુર્વિનશ્યતિ ॥ ૨॥

અરુણ ઉવાચ -
ભગવન્દેવદેવેશ કૃપયા પરયાઽધુના ।
નૃસિંહકવચં દિવ્યં ગુહ્યં ભક્તાય મે વદ ॥ ૩॥

સૂર્ય ઉવાચ -
શ‍ૃણુ પુત્ર પ્રવક્ષ્યામિ નૃસિંહકવચં શુભમ્ ।
યસ્ય વિજ્ઞાનમાત્રેણ નશ્યન્તિ સકલાપદઃ ॥ ૪॥

ગ્રહબાધા પ્રેતબાધા બાધા યા કુલદોષજા ।
કૃત્યયા જનિતા બાધા શત્રુબાધા સ્વકર્મજા ॥ ૫॥

શીઘ્રં નશ્યન્તિ તાઃ સર્વાઃ કવચસ્ય પ્રભાવતઃ ।
અસાધ્યા યે ચ દુસ્સાધ્યા મહારોગા ભયઙ્કરાઃ ॥ ૬॥

સદ્યો નશ્યન્તિ પઠનાત્કવચસ્યાસ્ય સારથે ।
જલભીતિશ્ચાગ્નિભીતિર્ભીતિઃ શત્રુગણાદપિ ॥ ૭॥

સિંહવ્યાઘ્રાદિજા ભીતિઃ શીઘ્રં સર્વા વિનશ્યતિ ।
સઙ્ગ્રામે દુર્ગમેઽરણ્યે સઙ્કટે પ્રાણસંશયે ॥ ૮॥

પઠતો વિજયો રક્ષા સુખં સૌભાગ્યસમ્પદઃ ।
પુત્રસૌખ્યં રાજસૌખ્યં ધનસૌખ્યમૃણક્ષયઃ ॥ ૯॥

કુટુમ્બવૃદ્ધિઃ કલ્યાણમારોગ્યં વિજયઃ સદા ।

અલ્પમૃત્યુભયં ઘોરં પાઠાદસ્ય વિનશ્યતિ ॥ ૧૦॥

અલ્પમૃત્યુહરશ્ચાત ઉપાયો ન પરઃ સ્મૃતઃ ।
અલ્પમૃત્યુહરં નામ કવચં ચેદમુત્તમમ્ ॥ ૧૧॥

સિંહપ્રણાદાન્મત્તોઽપિ ગજેન્દ્રસ્તુ પલાયતે ।
અલ્પમૃત્યુસ્તથા ચાસ્ય પાઠાત્સદ્યો નિરસ્યતે ॥ ૧૨॥

સહસ્રપઞ્ચકાવૃતિં પઠેદ્યઃ સુસમાહિતઃ ।
અલ્પમૃત્યુભયં તસ્ય પ્રભવેન્નૈવ કર્હિચિત્ ॥ ૧૩॥

અથ પાઠઃ -
નૃસિંહો મે શિરઃ પાતુ પાતુ ભાલં નૃકેસરી ।
ભ્રુવૌ નૃસિંહો મે પાતુ નૃસિંહો નયનદ્વયમ્ ॥ ૧૪॥

નૃસિંહો નાસિકે પાતુ કર્ણૌ પાતુ નૃકેસરી ।
નૃસિંહો મે મુખં પાતુ કપોલૌ રક્ષતાદ્ધરિઃ ॥ ૧૫॥

નૃસિંહશ્ચિબુકં રક્ષેત્કણ્ઠં પાતુ નૃકેસરી ।
સ્કન્ધૌ પાતુ નૃસિંહો મે ભુજૌ પાતુ નૃકેસરી ॥ ૧૬॥

કરદ્વયં નૃસિંહોઽવ્યાન્નૃસિંહો રક્ષતાદુરઃ ।
નૃસિંહો હૃદયં પાતુ નૃસિંહોઽવ્યાત્તથોદરમ્ ॥ ૧૭॥

કુક્ષિં નરહરિઃ પાતુ નાભિં પાતુ નૃકેસરી ।
બસ્તિં ચ ગુહ્યદેશં ચ નૃસિંહોઽવ્યાત્સદા મમ ॥ ૧૮॥

નૃસિંહો જાનુની પાતુ જઙ્ઘે પાતુ નૃકેસરી ।
પાદૌ ગુલ્ફૌ સદા પાતુ નૃસિંહો મમ રક્ષકઃ ॥ ૧૯॥

અગ્રતઃ પૃષ્ઠતો મેઽવ્યાત્તથા પાર્શ્વદ્વયં સદા ।
નૃસિંહઃ સર્વગાત્રાણિ મમ રક્ષતુ સર્વદા ॥ ૨૦॥

નૃસિંહો રક્ષતાત્પૂર્વે વહ્નિકોણે નૃકેસરી ।
નૈરૃત્યાં નરસિંહોઽવ્યાનૃસિંહઃ પાતુ પશ્ચિમે ॥ ૨૧॥

નૃસિંહો વાયુકોણેઽવ્યાદુત્તરેઽવ્યાન્નૃકેસરી ।
નૃસિંહોઽવ્યાત્તથેશાને હ્યધ ઊર્ધ્વં સમન્તતઃ ॥ ૨૨॥

જલે સદા રક્ષતુ માં નૃસિંહઃ સ્થલેષુ માં પાતુ સદા નૃસિંહઃ ।
નભસ્તલે ભૂમિતલે સમન્તાનૃકેસરી રક્ષતુ સર્વદા મામ્ ॥ ૨૩॥

દુર્ગાધ્વદુર્ગભવનેષુ ચ સઙ્કટેષુ
    પ્રાણપ્રયાણભયવિઘ્નસમુચ્ચયેષુ ।
શીતોષ્ણવાતરિપુરોગભયેષુ યુદ્ધે
    સઙ્કષ્ટનાશનપરોઽવતુ માં નૃસિંહઃ ॥ ૨૪॥

છિનત્તુ ચક્રેણ સદાઽરિવર્ગાન્સર્વાન્નૃસિંહો મમ મૃત્યુરૂપાન્ ।
અસાધ્યદુસ્સાધ્યસમસ્તરોગાન્ભિન્દ્યાન્નૃસિંહઃ સ્વગદાભિઘાતૈઃ ॥ ૨૫॥

પ્રેતાન્પિશાચાન્સગણાન્સ્વનેન શઙ્ખસ્ય વિદ્રાવયતાન્નૃસિંહઃ ।
કૂષ્માણ્ડબાલગ્રહયક્ષરક્ષઃ સ ડાકિનીઃ શાકિનિકાઃ સમસ્તાઃ ॥ ૨૬॥

ખડ્ગેન મે મૃત્યુનિસર્ગપાશં સઞ્છિદ્ય માં પાતુ સદા નૃસિંહઃ ।
સદાઽપમૃત્યોશ્ચ તથાઽલ્પમૃત્યોર્વિમોચ્ય માં રક્ષતુનારસિંહઃ ॥ ૨૭॥

ભક્તસંરક્ષણાર્થાય વિદાર્યસ્તમ્ભમુદ્ગતઃ ।
નૃસિંહો રક્ષકઃ સોઽસ્તુ મૃત્યુઃ કિં મેં કરિષ્યતિ ॥ ૨૮॥

અટ્ટાટ્ટહાસતો યસ્ય સર્વે દેવાશ્ચકમ્પિરે ।
નૃસિંહો રક્ષકઃ સોઽસ્તુ મૃત્યુઃ કિં મે કરિષ્યતિ ॥ ૨૯॥

હિરણ્યકશિપોર્વક્ષો દદારનિશિતૈર્નખૈઃ ।
નૃસિંહો રક્ષકઃ સોઽસ્તુ મૃત્યુઃ કિં મે કરિષ્યતિ ॥ ૩૦॥

યસ્ય ભ્રૂભઙ્ગમાત્રેણ ત્રસ્તમાસીજ્જગત્ત્રયમ્ ।
નૃસિંહો રક્ષકઃ સોઽસ્તુ મૃત્યુઃ કિં મે કરિષ્યતિ ॥ ૩૧॥

ઉત્ક્ષિપ્તસટયા વ્યગ્રા દેવા દૈત્યા વિદુદ્રુવુઃ ।
નૃસિંહો રક્ષકઃ સોઽસ્તુ મૃત્યુઃ કિં મે કરિષ્યતિ ॥ ૩૨॥

યન્નામસ્મરણાદેવ દહ્યન્તે વિઘ્નરાશયઃ ।
નૃસિંહો રક્ષકઃ સોઽસ્તુ મૃત્યુઃ કિં મે કરિષ્યતિ ॥ ૩૩॥

યદઙ્ઘ્રિધ્યાનતઃસદ્યો વિલીયન્તેઽઘરાશયઃ ।
નૃસિંહો રક્ષકઃ સોઽસ્તુ મૃત્યુઃ કિં મે કરિષ્યતિ ॥ ૩૪॥

માતા નૃસિંહશ્ચ પિતા નૃસિંહો ભ્રાતા નૃસિંહશ્ચ સખા નૃસિંહઃ ।
બલં નૃસિંહો દ્રવિણં નૃસિંહઃ સર્વં નૃસિંહો મમ દેવદેવઃ ॥ ૩૫॥

ઇતિ તે કથિતં પુત્ર નૃસિંહકવચં શુભમ્ ।

અસ્ય ધારણતઃ પાઠાદલ્પમૃત્યુઃ પ્રશામ્યતિ ॥ ૩૬॥

શતં વાઽથ તદર્ધં વા તદર્ધં વા સદક્ષિણમ્ ।
વિપ્રેભ્યઃ પુસ્તકં દદ્યાદલ્પમૃત્યુપ્રશાન્તયે ॥ ૩૭॥

ઇતિ શ્રીસૂર્યારુણસંવાદે અપમૃત્યુહરં
નૃસિંહકવચં સમાપ્તમ્ ॥

॥ ૐ તત્સત્પરમાત્મનેનમઃ ॥

Encoded by Ganesh Kandu kanduganesh at gmail.com
Proofread by Ganesh Kandu, NA

*Shri Nrisimha Kavacham*

pdf was typeset on July 5, 2021

Please send corrections to *sanskrit@cheerful.com*